**International Journal of Research in Social Sciences**
Vol. 8 Issue 8, August 2018,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# पाणिनीयप्रत्याहारप्रतिपत्ति:

- डॉ. जयप्रकाश साहु

## वृद्धिरादैच् 1.1.1

"आदैच्च वृद्धिसंज्ञ: स्यादिति[1] सिद्धान्तकौमुदीकारेण वृत्ति: प्रदर्शिता वैयाकरण-सिद्धान्तकौमुद्याम् । प्रकृतसूत्रे पदद्वयमस्ति। तद्यथा-वृद्धि:, आदैच् इति । संज्ञासूत्रमिदम् । सञ्ज्ञासूत्रे एकं पदं संज्ञावाचकं भवति शिष्टं पदं सञ्ज्ञी भवति । अतोऽत्र वृद्धि: संज्ञा तथा आदैच् सञ्ज्ञी । 'आदैच्' इत्यस्य पदच्छेदे कृते सति पदद्वयं प्राप्यते-आत्, ऐच्। व्याकरणशास्त्रे तपरवर्ण: स्वसमकालस्यैव बोधको भवति- 'तपर: तत्कालस्य'। तपरोद्विधा व्याख्यायते- 1. त: परो यस्मात् स: - तपर: । 2. तात्परो य: स: तपर:। इत्थम् 'आत्' तथा 'ऐच्' इतिपदद्वयं तपरत्वेन स्वसमकालस्यैव बोधनं करिष्यत: किन्तु 'आ'कारस्य 'अण्'-प्रत्याहारेऽग्रहणाद् आत् पदं तपरपरिभाषापरिधौ नायाति। अस्यां दशायां केवलम् 'ऐच्' पदं तपरत्वेन स्वीकरिष्यते। अत एव सूत्रार्थो भवति-तद्भावितानाम् अतद्भवितानाम् आ, ऐ, औ इत्येषां वृद्धिसञ्ज्ञा भवति।

अत्रत्योऽयमाशय: - पूर्वपदे 'वृद्धि:' तथा उत्तरपदे आदैच् इति प्रोक्तं भगवता पाणिनिना। वृद्धिरत्र विधेयम् 'आदैच्' इत्युद्देश्यम्। नियमानुसारेण उद्देश्यलक्षणं प्राथम्यं स्यात् किन्तु भगवता विधेयपदमादौ व्यवस्थापितम्। किमत्र कारणमिति जिज्ञासायां भगवता भाष्यकारेण समादधता कथितं -'मङ्गलार्थं वृद्धिशब्दमादित: प्रयुङ्क्ते।'[2]

एतत्सूत्रसन्दर्भे शङ्केयं समुपस्थिता भवति यद् 'वृद्धिरादैच्' सूत्रे पदान्तचकारस्थाने 'चो: कु'[3] इति सूत्रेण कुत्वं कथन्न क्रियते? अस्य समाधानं प्रोच्यते यत् 'अयस्मयादीनिच्छन्दसि।'[4] इति सूत्रेण भसंज्ञात्वात् कुत्ववारणम्। यद्यत्र कथ्यते यत् प्रकृतसूत्रेण जायमाना भसंज्ञा विधि: छन्दसि एव प्रवर्तते। वृद्धिरादैच् सूत्रस्य छन्दोऽभावात् तत्र भसंज्ञा न भविष्यति। यदि भसंज्ञांमत्वा कुत्ववारणं क्रियते तर्हि 'वृद्धिरादैचजदेङ्गुण:' इति संहितापाठे जश्त्वेन जकारोऽपि न भविष्यति। छन्दसि तु भ-पदसंज्ञापि युगपद् दृश्यते। यथा—'स सुष्टुभा स ऋक्वता गणेन' इत्यत्र 'ऋक्वता' शब्दे पदसञ्ज्ञात्वात् ऋच: चकारस्य कुत्वं सञ्जातम् एतेन सहैव भसंज्ञात्वाद् जश्त्वेन ककारस्य गकारो न जात:। इत्थमेव प्रकृतसूत्रेऽपि पदसञ्ज्ञां मत्वां जश्त्वं भविष्यति किन्तु भसंज्ञां मत्वा कुत्वं न भविष्यति।

अत्र तद्भावितग्रहणप्रयोजनम् अतद्भावितग्रहणप्रयोजनमन्थनं दृश्यते। तद्भावित- पदार्थस्तावद् वृद्धिपदोच्चारणं विधाय ये आ-ऐ-औ-एते उपपादिता भवन्ति तेषां ग्रहणं कर्त्तव्यम् अथवा येषां केषाम् अपि आ-ऐ-औकाराणां तद्भावितग्'हणस्वीकारेऽनेके दोषा: आपतन्ति। शालीय:, मालीय: इत्यादिषु वृद्धाच्छ:[5] इति सूत्रेण 'छ' प्राप्तिर्नभवति, आम्रमयम्, शालमयम् इत्यादिषु 'नित्यं वृद्धशरादिभ्य:'[6] इति सूत्रेण वृद्धिसंज्ञानिमित्तं मत्वा विकारावयवार्थे मयट् प्रत्ययविधानं प्राप्तं न भवति। आम्रगुप्तायनि:, शालगुप्तायनि: इत्याद्युदाहरणेषु 'उदीचां वृद्धादगोत्रात्'[7] इति सूत्रेणापत्यार्थे फिञ् प्रत्ययविधानाप्राप्ति:। अतद्भावितग्रहणे सति 'सर्वभाष:' इत्यत्र कर्मधारय तत्पुरुषसमासे, उत्तरपदे वृद्धिसंज्ञकस्याकारस्य विद्यमानत्वाद्[8] उत्तरपदवृद्धौ सर्वं च" इति सूत्रेण सर्वपदम् अन्तोदात्तं भविष्यति।

इत्थमेव तावद्भार्य:, यावद्भार्य: इत्यादिषु[9] 'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' आसर्वनाम्न:[10] सूत्राभ्याम् आगतस्य आकारस्यापि वृद्धिसंज्ञात्वात् तत्सत्वे तद्धितप्रत्ययस्य वतुपो निमित्ततया पुंवद्भावनिषेध: प्राप्तो भवति। भगवता पतञ्जलिनात्र समाधानं कृतम्—'नैष दोष:। नैवं विज्ञायते—"वृद्धेर्निमित्तं वृद्धिनिमित्तं वृद्धिनिमितस्येति। कथं तर्हि? वृद्धेर्निमित्तं यस्मिन् सोऽयं वृद्धिनिमित्त: वृद्धिनिमित्तस्येति। किं च वृद्धेर्निमित्तम्? योऽसौ ककारो ञकारो णकारो वा। अथवा य: कृत्स्नाया वृद्धेर्निमित्तम् । कश्च कृत्स्नाया: वृद्धेर्निमित्तम् ? यस्त्रयाणामा-कारैकारौकाराणाम्' इति ।[11] प्रस्तुतसूत्रसन्दर्भे भगवता पतञ्जलिना प्रोक्तम्—'प्रमाणभूत आचार्यो दर्भपवित्रपाणि: शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं, किं पुनरियता सूत्रेण' इति ।[12]

अन्यच्च—एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम्। माङ्गलिक आचार्यो महत: शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादित: प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति। सर्वत्रैव हि व्याकरणे पूर्वोच्चारित: संज्ञी, परोच्चारिता संज्ञा 'अदेङ्गुण:' इति यथा'।[13]

इतोऽग्रे महाभाष्यकारेण वृद्धिसंज्ञाविधौ प्राप्तान्योन्याश्रयदोषपरिहारोऽपि कृत:। यतोहि—सतो वृद्ध्यादिषु संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धि:। यथा च प्रसिद्धम्-अन्योन्याश्रयाणि च कार्याणि न प्रकल्प्यन्ते।

सूत्रेऽस्मिन् 'आत्' तपरकरणं बहुव्रीहि पञ्चमीतत्पुरुषसमासयोरुदाहरणत्वात् पूर्वार्थ:=अकार:, परार्थ:=ऐच् इत्युभयकृते तपरकरणम्; अर्थात् बहुव्रीहिसमासे कृते आकारस्तपर:, एतावता स स्वसमकालवर्णानां षण्णाम् आकाराणामेव कृते 'ऐच्' तपरोभवति।

यदि कथ्यते सूत्रस्यास्य 'आकार:' अण् नास्ति। अणा तु णकारयुक्तेन भाव्यम्। अस्यां स्थितौ यदा 'अणुदित्' सूत्रेण आकारस्य सवर्णिनो ग्रहणं न प्राप्तं तदा तन्निवृत्यै 'आत:' तपरकरणं निरर्थकम्।

यद्यपि तपरकरणमनावश्यकं तथापि तदभावे 'आ+ऐच्' इति दशायां वृद्धि: सेत्स्यति। फलत: स्पष्टप्रतिपत्तेरभाव:। सन्देहनिवारणाय तपरकरणमावश्यकम्।

वृद्धिरादैच् सूत्रे आदैच्निष्ठवाच्यतानिरूपितवाचकताया वृद्धिपदे विधानत्वादिदं प्रतीयते यत् वृद्धिपदे 'आदैच्' इत्यस्य वाचकता पूर्वं नासीत्। अस्यां स्थितौ भाष्यकारस्य 'सिद्धे शब्दार्थसम्बन्धे' इति कथनं कथं सङ्गतं स्यात्?

प्रश्नस्यास्य समाधानार्थमेव श्रीनागेशभट्टेन कथितम्—'वाचकताबोधकत्वेऽपि तदनुत्पादकत्वान्न शब्दार्थसम्बन्धनित्यताहानि:। आसाञ्च शिष्टप्रयुक्तत्वात्साधुत्वमिन्यत्र विस्तर:' इति ।[14]

यथोद्देशपक्षकार्यकालपक्षयोरपि प्रकृतसूत्रे विमर्श: सञ्जात.। तत्रायं निष्कर्षो यद् यथोद्देशपक्षे कार्यकालपक्षे च संज्ञासूत्राणां वाक्यार्थबोध: पृथक् भवति। कार्यकालपक्षे वाक्यार्थबोधो विधिस्थाने भवति किन्तु यथोद्देशपक्षे संज्ञासूत्रस्य स्वकीयस्थाने। इत्थं संज्ञासूत्राणां वाक्यार्थबोधानन्तरं विधिसूत्रेण तस्यैकवाक्यता भवति। इत्थम् उभयपक्षेऽपि 'वृद्धिरादैच्' सूत्रघटितम् ऐच्पदम् उद्देशकोटौ प्रविष्टम्। तस्य विधेयत्वाभावादत्र भाव्यमानपरिभाषया सवर्णग्रहणाभावो न सिद्ध्यति। अत एव त्रिमात्रिकस्य ऐच: वृद्धिसंज्ञावारणार्थम् 'आत्' पदे तपरकरणमुभयपक्षे यथोद्देशे कार्यकाले चावश्यकम्।

**आद् गुण: (6.1.87)**

'आद् गुण:' इति, 'आद्' इति पञ्चम्यन्तम्, न तु तपर: प्रथमान्त:, अनन्वयात्, 'आदित्येषा पञ्चमी अचीति सप्तम्या: षष्ठीं प्रकल्पयिष्यति' इति भाष्याञ्च। 'एक: पूर्वपरयो:' इति, 'अचि' इति चानुवर्तते। तदाह—अवर्णादचोत्यादिति। अत्र 'पूर्वपरयो:' इति इतरेतरयोगद्वन्द्वनिर्देशेन पूर्वस्य परस्य च प्रत्येकस्यापि स्थानित्वम्। अन्यथा समाहारेणैव निर्दिशेत्। उपेन्द्र इति—इन्द्रमुपगत इत्यर्थे 'अत्यादय:' इति द्वितीयातत्पुरुष:। उपेन्द्रो विष्णु:, स हि कश्यपाद् अदितौ इन्द्रानुजतया सञ्जात:। 'उप इन्द्र:' इत्यत्र अकारेकारयो: कण्ठतालुस्थानजन्यतया आन्यतरतम्यात् कण्ठतालुजन्य एकार एव गुणो न त्वकार:। 'आद्' इत्यत्र 'अ' इत्यष्टादशाकाराणां संज्ञा। तथा च अपदेन दीर्घादीनामपि बोधात्। तथा अच्पदवाच्या अकारादिचान्ता वर्णा:। तद्वाच्या अकारादिसवर्णा इत्यत: पूर्वपरयोर्दीर्घयोरुदाहरणमाह—रमेण इति—रमाया:=लक्ष्म्या ईश: पतिर्विष्णु:। पूर्ववदान्तरतम्यादेकार:, गङ्गाया उदकम् 'गङ्गोदकम्'=गङ्गाजलम् इत्यत्रापि पूर्वपरयो: स्थाने ओकार:। अत्र स्थानिनश्चतुर्मात्रकत्वेऽपि हिमात्रकावेव एकारौ, 'अदेङ्गुण:' इत्यत्र तपरकरणेन द्विमात्रकयोरेव एकारौकारयोर्गुणात्वात्। कृष्णस्य=वासुदेवस्य ॠद्धि:=वृद्धि:। 'कृषे वर्णे' (उ.3 पा. 1 सू.) इति नकि कृष्ण इति। 'ॠधु वृद्धौ' इत्यत: क्तिनि ॠद्धिरिति। 'कृष्ण ॠद्धि' इत्यत्र 'आद् गुण:' इति प्राप्नोति। अत्र अकार ॠकारश्चेति द्वौ स्थानिनौ। तयो: स्थाने अकार एकार ओकारश्चेति त्रयो गुणा: प्राप्नुवन्ति। तत्र अकारेण स्थानिना कण्ठस्थानजन्यत्वेन साम्यन्तु त्रयाणामपि गुणानाम् इत्यविशेषात् त्रयो गुणा: प्राप्नुवन्ति। ॠकारेण स्थानिना तु मूर्द्धस्थानजन्यत्वेन केषुचिदपि गुणेषु साम्यं नास्ति इति विधानसामर्थ्यात्सर्वे गुणा: प्राप्नुवति। एवम् लृकारेण स्थानिनाऽपि कस्यापि गुणस्य साम्यं नास्ति, गुणेषु दन्तस्थानजन्यत्वाभावात्। एवञ्च अकारॠकारयो:, अकारलृकारयोश्च कतमो गुण: सयादित्याकाङ्क्षायामाह—'उरण् रपर:' इति ।[15]

**उरण् रपर: (पा. 1.1.51)**

'ॠ' इति त्रिंशत: संज्ञेत्युक्तम्। तत्स्थाने योऽण् स रपर: सन्नेव प्रवर्तते। इति सूत्रवृत्ति:[16] (पा. 6.1.85) योऽयमेकदेश: स पूर्वस्याऽन्तवत् परस्यादिवत् स्यात्। इति सूत्रवृत्ति:।[17] प्रस्तुतसूत्रव्या'यानं कुर्वता श्रीनागेशभट्टेन लघुशब्देन्दुशेखरे प्रतिपादितम्—"अन्ता। इह 'पूर्वपरयोरि'ति वर्तते, यथासख्यञ्च, अन्तादिशब्दावुपस्थितैकादेश-स्थानिपरौ। पूर्वपरशब्दौ च तद्धटितसमुदायपरौ। एवञ्च—'पूर्वस्य परस्य समुदायस्यान्ताद्भियां वर्णाभ्यां पृथगवस्थिताभ्यां ये व्यवहारा:—प्रातिपदिकत्वसुबन्तत्वप्रत्ययत्वादयस्ते कृतैकादेशस्य भवन्ति, न तु तद्वर्णमात्रवृत्तयोऽत्वह्रस्वत्वादय' इत्यर्थस्तत्फलितमाह-योऽयमित्यादि। तेन रामावित्यादौ परादिवत्त्वेन औ इत्यस्य सुत्वे, पूर्वमान्तस्यैकदेशविकृतन्यायेन प्रकृतित्वे, यस्माद्विहितस्तदादित-दन्तत्वमार्थसमाजग्रस्तमिति पदत्वसिद्धि:। तद्वर्णमात्रवृत्तिधर्मानति-'अन्तादिवच्च' इति सूत्रस्य व्याख्यां कुर्वन् श्रीवासुदेवदीक्षितो विशदरीत्या प्रतिपादयति यत् सूत्रेऽस्मिन् 'एक: पूर्वपरयो:' सूत्राधिकार:। यथासंख्यपरिभाषया पूर्वसम्बन्ध: अन्तेन सह तथा परसम्बन्ध: आदिना सह भवति। यद्यपि यत्र एकादेशो भवति तत्र द्वौ वर्णौ स्थानिनौ भवत:—पूर्व: परश्च, तयोश्च वर्णयो: प्रत्येकमेकत्वादखण्डत्वात् तदपेक्षया एकादेशस्य अन्तादिवत्त्वकथनमसङ्गतम् तथापि

पूर्वपरवर्णयोर्भवन्नेकादेश: प्रथमस्थानिघटितसमुदायस्य पूर्वस्य योऽन्त: प्रथमस्थानी तत्कार्यकारी भवति। द्वितीयस्थानिघटितसमुदायस्य उत्तरस्य य आदिर्द्वितीयस्थानी तत्कार्यकारी भवतीत्यर्थो विवक्षित:। तत्र पूर्वान्तवत्त्वे यथा—क्षीरपेण। क्षीरप-इनेति स्थिते 'आद्गुण:' इत्येकादेश एकार:। तत्र पूर्वान्तवत्त्वेन पे इत्युत्तर पदस्य एकाच्त्वात् 'एकाजुत्तरपदे ण' इति णत्वं भवति।

अत्र एकादेशे स्थानिवत् सूत्रं न प्रवर्तते। एकदेशस्थानीभूतं पकारादकारमालम्ब्य पे इत्यस्य एकाजुत्तरपदत्वाश्रयेण प्रवर्तमानस्य णत्वस्य स्थान्यलाश्रयत्वात्। यद्यपि एकाजुत्तरपदत्वमेव प्राधान्येन णत्वविधिराश्रयति, पकारादकारं स्थान्यलं तु तद्विशेषणीभूताच्त्वेनाश्रयति, तथाप्यनल्विधाविति निषेधोऽत्र भवत्येव, यथाकथञ्चित्स्थान्यलाश्रयणस्यैव तत्र विवक्षितत्वात्। अन्यथा प्रतिदीव्येत्यत्र क्त्वादेशं ल्यपं स्थानिगतवलाद्यार्धधातुकत्वेन आश्रित्येडागमे कर्त्तव्येऽनल्विधाविति निषेधानुपपत्ति:। तत्र वल: प्राधान्येनाश्रयणाऽभावात्। एतेन 'स्थानिवत्' सूत्रेण गतार्थमिदं सूत्रमिति निरस्तम्। परादित्वे यथा—खट्वा। अत्र खट्वाशब्दाद् अजाद्यतष्टाप्। सवर्णदीर्घ आकार:। तस्य परादित्वेन टाप्त्वात्तत: परस्य सोर्हल्ङ्याादिलोप:। इदमपि स्थानिवद्भावेन अनिर्वाह्यम्। हल्ङ्यादिलोपस्यात्र स्थान्यलाश्रयताया: मूलकृतैव वक्षमाणत्वात्। न चैवं सति यजेर्लङि उत्तमपुरुषैकवचने इटि शपि आद्गुणे अडागमे अयजे इन्द्रमित्यत्र गुणस्य एकादेशस्य परादिवत्वेन इकारत्वात् तत्रेकारे परे सवर्णदीर्घ: स्यादिति वाच्यम्। इह हि अल्समुदायधर्मा एव प्रातिपदिकत्वसुबन्तत्व-प्रत्ययत्वादयोऽतिदिश्यन्ते, न तु वर्णमात्रधर्मा अत्वह्रस्वत्वादय:। उक्तञ्च भाष्ये—'न वा अताद्रूप्यातिदेशादिति। अन्तादिवर्णमात्रवृत्तिधर्माननति-देशादयजे इन्द्रम् इत्येवं जातीयकेषु सवर्णदीर्घादिकं न भवतीत्यर्थ:" इति।

'अन्तादिवच्च' इति सूत्रेण पूर्वान्तवद्भावपरादिवद्भावौ गृहीतौ। पूर्वस्यान्वय: अन्तेन सह परस्यान्वय आदिना भवति। अन्तशब्दोऽत्र एकादेशस्य पूर्वस्थानिन: बोधकोऽस्ति। पूर्व-परस्थाने यत्र एकादेश: क्रियते तत्रैकादेशस्य पूर्वस्थानी पूर्वसमुदायान्तो भवति तथा परस्थानी उत्तरसमुदायस्य आदि:। इत्थं पदयोजनया सूत्रार्थो भवति यद् य एकादेशविशिष्टो भवति स पूर्वस्थानीघटितसमुदायवत् तथा परस्थानीघटितसमुदायवद् भवति। अत्र पूर्वस्थानीघटितसमुदाय-वतस्तात्पर्यमस्तिपूर्वान्तवद्भाव: तथा परस्थानिघटितसमुदाय-वतोऽर्थस्तावत् परादिवद्भाव:। कार्यानुरोधेनैतौ कि'येते। पूर्वान्तवद्भाव-परादिवद्भावौ एकस्मिन्नेव स्थले युगपन्न भवत:।

कथनमिदं 'प्राच्र्छति' इति प्रयोगे प्रमाणयितुं शक्यते—प्र+ऋच्छति इति दशायाम् अ+ऋ स्थाने आर् वृद्धिरेकादेश: कि'यते। एकादेशविशिष्टो भवति 'प्रार'। 'प्रार' एकादेशस्य पूर्वस्थानिनाऽकारघटितसमुदायेन 'प्र' इत्यनेन तुल्यं भवति। 'प्र' तुल्यत्वात् 'प्रार' अपि पदं रेफश्च पदान्त:। यदा पदान्तरेफस्य विसर्ग: प्राप्तस्तदा 'कर्तरि चर्षौ' इत्यादिनिर्देशाधारे तस्य वारणं कि'यते। परादिवद्भावस्य उदाहरणं तु 'रामौ' प्रयोग:। राम+औ इति दशायां वृद्धौ सत्यां 'रामौ' इत्यस्य पदत्वं स्वीकर्त्तुं परादिवद्भावेन 'औ' इत्यस्मिन् सुप्त्वमानीयते तथा मान्ते 'राम्' इत्यंशे प्रकृतित्वमानीयते। इत्थमत्र पदत्वसिद्धि:।'अन्तादिवच्चे'ति सूत्रं पूर्वस्थानिघटितसमुदायधर्मस्य तथा परस्थानिघटितसमुदायधर्मस्य आनयनं विदधाति। अर्थात् अनेन सूत्रेण समुदायवृत्तिधर्मस्य प्रातिपदिकत्वसुबन्तत्व-प्रत्ययत्वादिधर्माणामेव अतिदेश: क्रियते।

अनेन सूत्रेण अन्तादिवर्णवृत्ति—अत्व-इत्व-ह्रस्वत्वादिधर्माणाम् अतिदेशो नैव जायते। अत एव खट्व+आ इत्यत: सिद्धे 'खट्वा' शब्दे आकारे अत्वादिदेशो न भवति तेन खट्वाभि:' इति प्रयोगे 'अतोभिस्ऐस्' इत्यनेन भिस: 'ऐस्' न भवति।

भट्टोजिदीक्षितेन स्थानिवत्सूत्रेण गतार्थतेति प्रोक्तम्। श्रीनागेशभट्टोऽत्र प्रतिपादितवान् यत् यद्यपि अल्मात्रवृत्ति-धर्मातिदेशोऽनेन सूत्रेण न क्रियते तथापि सूत्रमिदं स्थानिवत् सूत्रेण न गतार्थम्।[18] श्रीवासुदेवदीक्षितोऽपि नागेशमतस्य समर्थनमकरोदिति पूर्वमेव उल्लिखितम्। यतो हि कतिपयस्थलेषु स्थानिवद्भावो न प्रवर्तते किन्तु पूर्वान्तवद्भावस्तु भवितुमर्हति। यथा—क्षीरं पिबतीति क्षीरप:, तेन क्षीरपेण इत्यस्मिन् प्रयोगे एकाजुत्तरपदत्वमानीय 'एकाजुत्तरपदे ण:'[19] इति सूत्रेण णत्वं विधीयते। 'क्षीरपेण' इति प्रयोगे गुणे कृते 'पे' इत्यंशे: एकाच्त्वे सत्यपि नोत्तरपदं यतो हि तस्मिन् विभक्त्यंशोऽपि मिश्रित:। इदम् एकाजुत्तरपदत्वं 'स्थानिवत्' सूत्रेण न आयाति यतोहि अल्त्वव्याप्यधर्मघटितधर्मानयने तत्प्रवृत्तिरेव नास्ति। अत्र तु अल्त्वप्याप्यधर्म: अच्त्वधर्मघटितैकाजुत्तरपदत्वघटित:। अतो नात्र स्थानिवद्भावप्रवृत्ति:। किन्तु 'अन्तादिवच्च' इति सूत्रेण पूर्वान्तवद्भाव: तु भवितुमर्हति। अत्र एकादेशस्य पूर्वस्थानी अकारोऽस्ति, तद्घटितसमुदायोऽस्ति—'प' इत्यत्र आयास्यति। इत्थम् 'अन्तादिवच्च' इति सूत्रेण एकाजुत्तरपदत्वं सुलभम्।

**सन्दर्भ:**


1. वैयाकरणसिद्धान्तकौमुदी, टीकात्रयोपेता, पृ. 16
2. व्याकरणमहाभाष्यम्, पृ. 130
3. अष्टाध्यायी, 8.2.30
4. अष्टाध्यायी, 1.4.20
5. अष्टाध्यायी, 4.2.14
6. अष्टाध्यायी, 4.3.144
7. अष्टाध्यायी, 4.1.157
8. अष्टाध्यायी, 6.1.105
9. अष्टाध्यायी, 6.3.39
10. अष्टाध्यायी, 6.3.91
11. महाभाष्यम् वृद्धिसंज्ञासूत्रम्, पृ. 1339
12. महाभाष्यम्, पृ. 143
13. महाभाष्यम्, पृ. 147
14. लघुशब्देन्दुशेखरे, पृ. 140
15. सिद्धान्त कौमुदी, लक्ष्मीटीका, पृ. 127
16. वैयाकरणसिद्धान्तकौमुदी, पृ. 3
17. वैयाकरणसिद्धान्तकौमुदी, पृ. 47
18. यद्यप्यस्याप्यनल्विधावनिष्टत्वं तथापि स्थानिवद्भावेन गतार्थमिदमिति मनोरमादिसकलग'न्थास'तिरेव। ——लघुशब्देन्दुशेखरे, चिदस्थिमाला, पृ. 291
19. अष्टाध्यायी, 8.4.12

**सन्दर्भिकाः**


1. वैयाकरणसिद्धान्तकौमुदी——भट्टोजिदीक्षित, लक्ष्मीटीका 1-2, सभापति-शर्मोपाध्याय; मोतीलाल बनारसीदास, वाराणसी
2. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा तत्त्वबोधिनी सहित, वासुदेव दीक्षित-ज्ञानेन्द्रसरस्वती)——भट्टोजिदीक्षित, वाराणसी, 1979
3. वैयाकरणसिद्धान्तमञ्जूषा——नागेशभट्ट, वाराणसी——1977
4. वैयाकरणसिद्धान्तलघुमञ्जूषा——नागेशभट्ट, वाराणसी——1977
5. वैयाकरणसिद्धान्तपरमलघुमञ्जूषा——नागेशभट्ट, वाराणसी——1977
6. वैयाकरणसिद्धान्तकौमुदी, भाग प्रथम——भट्टोजिदीक्षित (सं. गोपालदत्त पाण्डेय), चौखम्बा विद्या भवन, वाराणसी——1997
7. वैयाकरणसिद्धान्तकौमुदी, लघुमञ्जूषा——नागेशभट्ट वाराणसी-1924
8. वैयाकरणभूषणसार:——कौण्डभट्ट, बनारस——1934
9. व्याकरणे नागेशभट्टकृतिषु तन्त्रस्य प्रभाव:——डॉ. राजनाथ त्रिपाठी, विश्वविद्यालय प्रकाशन, वाराणसी
10. व्याकरण की दार्शनिक भूमिका——डॉ. सत्यकाम वर्मा——1971
11. व्याकरण दर्शन भूमिका——रामाज्ञा पाण्डेय, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी——1971
12. व्याकरणमहाभाष्यम् (नवाििेकं)——पतञ्जलि: (अनुवादक-चारुदेव शास्त्री), मोतीलाल बनारसीदास, वाराणसी——1999
13. व्याकरणमहाभाष्यम् (प्रदीपोद्द्योत सहित)——पतञ्जलि, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली
14. व्याकरणशास्त्र का इतिहास, भाग-द्वितीय——पण्डित युधिष्ठिर मीमांसक, सोनीपत——1984
15. शब्दकौस्तुभ, भाग-प्रथम——भट्टोजिदीक्षित, चौखम्बा संस्कृत सीरीज, वाराणसी ——1991
16. शब्दकौस्तुभ, भाग-द्वितीय——भट्टोजिदीक्षित, चौखम्बा संस्कृत सीरीज, वाराणसी ——1991
17. शिशुपालवधम्——माघ, चौखम्बा सुरभारती प्रकाशन, वाराणसी——1991
18. श्रीमद्भगवद्गीता——गीता प्रेस, गोरखपुर
19. संस्कृतव्याकरणशास्त्र का इतिहास——युधिष्ठिर मीमांसक, सोनीपत——1984
20. श्र संस्कृत व्याकरण का उद्भव एवं विकास——डॉ. सत्यकाम वर्मा, प्र.सं. 1971
21. संस्कृत साहित्य का इतिहास——वाचस्पति गैरोला, चौखम्बा वाराणसी——1985
22. संस्कृत शास्त्रों का इतिहास——बलदेव उपाध्याय, शारदामन्दिर, दुर्गीकुण्ड, वाराणसी, प्र.सं. 1969
23. Bhattoji Dikhita : His Contribution to Sanskrit Grammer-by Dr. Suryakanta Bali.